॥श्रीवरदमूर्तये नमः॥ श्रीलक्ष्मीनृसिंहाय नमः॥ श्रीरामस्यपदारविंदयुगलं नत्वाथवागी
श्वरीं हेरंबं तपनादिकं ग्रहगणं रुद्रंच शेषादसुतं वक्ष्ये ताजिकसारमल्पसुगमं रम्यं सुबोधप्र
दं नानाताजिकतो विलोक्य रचितं दैवज्ञहर्षप्रदं १ यत्पूर्वार्जितमात्मदेहजनितं दैवं शुभं वा
शुभं तत्सर्वं हि विपाकमेति नियतं वर्षादिके निश्चितं सर्वैः संमतमत्र जन्मनि परं जंतोः स्फु
टं सूरिभिस्तस्मात्तत्परिचिंत्य वर्षजनितं वक्ष्ये फलं सूरिमान् २ यातो वर्षगणो हि जन्म
समया स्थाप्यश्चतुर्धा क्रमात्स्वे यां गाग्निभिरिंद्रियैंदुभिरिला रामैः खरामैर्हतः जन्माह
र्गणनाडिकापलयुतः स्यादिष्टवर्षादिगो यातोन्होनिचयः सयो जनिदिने यग्रंथतः साधितः
३ अथवा सप्तभ्रदस्राग्निखगाग्नि २९२२०७ निघ्नो याब्दवृंदः खखसर्प ८०० भक्तः
फलं दिनाद्यं सचघस्रवृंदयुक्तं स्फुटो वा द्युगणोब्दकादौ ४ अथाहर्गणादिष्टवर्षादिसाधनं

रुद्र११ घ्नो द्युगणो द्विनंदरसमि ६९२ लब्धेन युक्तो गणो भक्तोऽन्त्यन्द्युगैश्च ३०२ मासनि
करः स्याच्छेषितः तिथिः घस्रैः १५ संनिहितस्तत्सो गुणवियद्वालैः ५०२ रवासंचयस्तत्कं स्यु
स्तधिमासकाविरहिताः कार्याश्च मासव्रजात् ५ स्वर्यातागतवत्सराश्च सहितास्तत्कर्ण
शाकेन तो मासाः शेषमिते हि वर्षसमयाद्येवं निरुक्तो बुधैः कर्त्तव्याः खचरास्ततः स्फुटतरा भा
वाद्युवंदान्तितो हृव्यय आदि विचारिणा मिलिततो वीर्याणि संसाधयेत् ६ अथवा त्रिघ्ना द्रि
नि घ्ना ७०२ द्युगणाब्धिभक्तो द्विनंदत्तर्कैः ६९२ पृथगारव्यकं ततः २ साचाद्रिग्नि १००६ विहृतं फल
रव्यंसेकं खरामैः ३० निहितं विहीनं ७ पृथक् स्थितं चरसाग्नि ३६० भक्तं फलं गताब्दा विहृतं खरा
मैः ३० शेषं भवेन्मासमितिश्च चैत्रादि थेर्मितिः शेषमिता विचित्याः ८ अथ प्रकारांतरेण
राम्यां २ हृतैः ४ स्तीव्रकैरै १२ स्त्रिधाब्धानिघ्ना गजै ८ संविहृतं फलं यत् साब्दं ततो जन्मकवारमु

२

स्यैयुक्तं भवेद्वारो निवेशो वेला ९ अथवा बाणैर्यमै २ स्तर्कै ६ र्मितै स्त्रिघाबाणि घ्नाहता ४
त्यादिवसादिकं तत्र गाह्यं समेतं निजवार ५ क्षैर्वैः स्याद्द्वेरोद्धयाबादिनाद्यं १० अथ तिथ्यान
यनं यातब्दं द्रोणगुणवेदरामै ३४३ निघ्नः कुरामै ३१ विहृतो दिनाद्यं घस्रैः रवैः सहितं
खरामै ३० भक्तो वृत्तशेषा तिथिरत्र वर्षे ॥११॥ अथ नक्षत्रयोगानयनम् ॥ व्योमेन्दुभिः १० संगुणिता
गताब्दाः खवेदान्यवेदाब्धि २४०० लवैर्विहीना जन्मर्क्षयोगैः सहिता पृथक्स्था नक्षत्रयोगो
भवतो भतष्ठौ १२ गताब्दात्रिघ्नाद्यं धः २ न्यखरामै ३० रवाप्तफलं चोर्ध्वराशिषु युक्तं ततो
भानुभि १२ भक्तशेषेण सतेविलग्नं युतं तन्मेषादलग्नं १३ अथ संक्रान्तिनयनं शाको बाणयु
गाब्धिचंद्ररहितः १४४५ ससाभ्रदस्रै २०७ हतो भक्तः न्यखकुंजरै ८०० फलमिदं वारादिकं संयु
तं यातान्दैश्चैन गाम ७ भवत्तपनात्संक्रान्तिसंज्ञो ध्रुवो युक्तो सौ निजक्षेपकेर्दिनमुखे संक्रान्तयः
स्युः स्फुटाः १४ रसाद्रिभाक्षाः रवयमा भ्रवोजे रषेयमौ बाणशरौ त्रिनाश्चे रसाः खप

क्षास्त्रिशराश्च युग्मे कर्केब्धिनोदंतिशराद्रभाश्च १९ सिंहे रसास्तर्कयमास्त्रिपक्षाः स्त्रिभे
यमासर्पकराखपक्षाः गेहे व्यय: पंचशराः कुचंद्रा कोर्प्ये रसादंतिहताः खदस्त्रः २६ चा
पे भुवः सप्त भुवो द्विचंद्रा मृगे करास्तर्कगुणास्त्रिवेदः
युगानि रामास्त्रियमाश्च कुंभे मीने शराद्रब्धित्रिशाखप
क्षाः २७ ॥ अथ संक्रांतितिथ्यानयनं ॥ शाको बाणयुगा
ब्धिचंद्रै १४४५ रहितो रुद्रैर्हृतो ११ शेषो रवियुक्तसुत्येला २७०
सफलाधिकोभक्त्युतः ११ खाग्न्युद्धृतः शेषकं क्षेपाः स्यु
र्दनलेषु सप्त खचराः शेषदशास्तेक्रमाद्युक्तादाद्शाथ स्थितं हि तिथयः स्थूलाश्च क्रांति ऽजाः २८
अथ राशिरूपं ॥ रूक्षः शैलचरश्च रौद्रचरणो रक्तो तिरात्रो बलः स्पष्टः प्राग्गीशो । विषमोदयी दि

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
६	२	६	२	६	२	४	६	१	२	४	५
५८	५५	२०	५८	२६	२८	५५	५८	१७	३६	३	५२
२०	२४	५३	८	२३	२०	११	२०	१२	[illegible]	२३	२०
०	१	३	५	७	९	१०	१०	१०	१०	१०	१०

नचरो मेषोन्त्रसंज्ञो वृषः स्त्रीशुक्रो विषमोदयस्थिरतनुर्याम्यश्चरो रात्रिगः शीताढयः पृथिवी च
रो द्विचरणो रूक्षोऽहि मध्यप्रजः १९ युग्मो मध्यसवः शुक्रछविः समोन्नद्विस्वभावो हस्तकः शून्येघ
स्वचरो हि पश्चिमपतिः स्निग्धोतिशब्दो द्विपात् कर्कः स्त्रीक्षणदाचरो बहुसवः स्निग्धोथ सौम्यो
श्चरो बहंघ्रिर्जलगश्चपाटलतनुश्लेष्मादिः घिकः शीघ्रगः २० सिंहोल्पप्रसवस्थिरो द्विच
रणो रूक्षो द्युचारी दृढः प्राग्गीरोावनगोथ धूसरतनुः शब्दादिकः पैत्तिकः स्त्रीराशिस्तु हि नो
द्विपात्स्त्रीति चर्वौः स्त्री द्विस्वभावोल्पसूरूक्षो रात्रिचरश्चतुष्करश्चिकन्दमी याम्यपः २१ जू
कः पश्चिमदिक्प्रभुश्चरगोतिः स्वल्पप्रजः स्नेहवान् रुचित्राभोमम्नुजो हस्तकोथ तुलधराः कोप्योविरो
द्यो द्युगः शुक्लोरात्रिचरस्थिरो जलचरस्तुल्योन्दमीनाल्पसू स्निग्धः स्त्रीबहुपादकफलयुतः सौ
म्यश्चरः शून्यकः २२ पूर्वार्द्धं धनुषो द्विपात्सुरकेकुषुस्वामि द्युगोतिस्वनो हेमाभो द्विशरीरको

लघुतरोशीनस्तु तुल्योन्दमी. एणोद्विपमदोल्पस्वर्जलचर रव्यातश्चरोरात्रिगः स्त्रीरूक्षस्तु
हिनाथपिंगलतनुः शब्दार्घसंलक्षितः २३ कुंभः पश्चिमदिक्प्रभुस्थिरतनुः स्न्योविपादः
पुमान् स्निग्धोमध्यसवोष्टको मलचूरोघस्त्वानुगोल्पोऽधिहरत मीनोरात्रिचरो बुगश्चविपदः
स्त्रीद्विस्वभावः कफीस्निग्धोभूरिसवोद्भूशब्दसहितः सौम्यश्चरः पिंगलः २४ दीर्घाः कर्कटतः
षदेवकथितास्तुल्योदयाः षण्मृगात् स्याः स्युर्विषमोदयाः क्रियघटौ तुल्यो निरुक्तौ चतौ मेष
स्यात्सबला स्ववर्गविषये होरात्रिगानां भवंशाचिंत्यं राश्यनुसारतो हि सकलं प्राज्ञैः फलं राशिजं २५॥
अथ ग्रहस्वरूपं॥ प्राचीशः स्थिरो दृढो वनचरो सत्त्वीपं नगोऽद्रिपात्रे पित्तान्द्याद्रुपतिः पुमान् कटु
तरो दुष्टः पशुर्हेमरुक् चंद्रो रात्रिचरो कफी सुनयनः स्थूलः प्रलंबो घृणी गौरो वैश्यपतिर्मृदु जे
लचरो वायवीश्वरः स्त्रीप्रहः २६ मार्तेयश्चपलश्च दुष्टखचरः क्षत्री चतुष्पात्कटुर्याम्यगो॥

वनगोरुणः सुतनुवान् हिंस्रोवुवादग्धभूः सौम्ये मार्गचरः शिशुः शुभखगः शूद्रोऽस्थसो
म्याधिपः स्त्रीखेटः कनकप्रभः सुमतीमान् जीवः सुवृत्तः खगः २७ जीवो ग्राम्यचरो द्विपात्
शुभखगः पित्तोद्युगोवर्तुलो विप्रो रोमधुरो वणिक् नरचरो हैरण्यदिक्स्थो लघुः शुक्रा स्त्री
मलगो द्विजो क्षितिचरः श्लेष्मान्वितोऽथ द्विपात् रूप्याभोऽचलगोति सौम्यखचरस्त्वाग्र
यपश्चाम्लकः २८ मंदः ह्रस्वतनुः स्थिरो वनचरो लोलः हरो वातुलो दीर्घोम्लेच्छपतिः ख
लोवरुणदिक् स्वामी खगस्तोवरः प्राहुर्मंदवदेव केचन वधुधाराहुर्निषादाधिपः सर्पःस्ते
थ सवाद्व रोहिविषयेचेत्थं ग्रहाणां फलं ।। २९ ।। अथ भावसाधनं ।। तत्वादिभावास्तनु वित्तबं
धु सुत्हत्सु नारि प्रमदा विनाशाः धर्मर्क्षकर्माय इति व्ययश्च लग्नं तथाराशिरष्टहं चहोरा
३० सुखात्सुखं केशवयःप्रमाणं हानिं तथावर्णविचिंतनं च शैलादि जातिस्तनुतो धनाच्च

प्रवाल धात्वाद्य खिलं विचिंत्यं ३१ सहोत्थ सौख्यं सहजाद्विचिंत्यं सुखात्सुखं क्षेत्र गृह प्रवेशाः
आराम भैषज्यनिधि प्रकार्यं सुतात्प्रविद्यात्सुतसौख्यकंच ३२ कुष्ठ प्रमेहमादि रुजो व्रणानि
परांगनामातुल वर्गकादि दास्यादिकं ध्यानचतुष्पदादि द्यं चिंत्य हि चात्र भवनाप्य सर्व
३३ मदाप्य वाणिज्य विवाद चौर्यं दूरोदरं स्त्रीचगमागमादि मृते श्वर्म तुस्थिर वस्तु का
धं रुग्व्याकुलाद्यं खलु नष्टमायुः ३४ दीर्घाध्व यात्रा खिल धर्म भाग्य पुरादि गेहाद्य रिव
लं च धर्मात् खभाच्व वृष्टि क्रयविक्रयादि स्वाचारकर्मा खिलराजकार्यं ३५ लाभात्सु खार्थ
नगमनं विलासमकूप्य कूप्याय पदं कणाद्यं व्याया द्व्ययोरि व्यसनं स्वबंधु विद्वेषकृयाद्य
खिलं विलोक्यं॥ ३६॥ अथ ग्रहसाधनं॥ विना ग्रहैःस्पष्टतरैर्न किंचित्फलं प्रवक्तुं नितरां
क्षमं स्यात् अतः खगानां खलु साधनार्थं क्रमं ब्रुवे देवविदां हिताय ३७ षष्ठ्या ६० हता

५

अंतरभावलिप्तिका अथ स्थिताभिर्विकलाभिरन्विता सर्वर्क्षनाडीविहृतास्तु वक्रिणां मार्ग।
स्थितानांच कलादिका गतिः ३८ श्रीसूर्यतुल्याकरणेन्नमोदास्यपष्टाग्रहाराजेमंगंाकनेच्य
पंचांगपत्रादथ वच्मि सम्यक्सु संप्रदायाद्विदुषां सुखार्थं ३९ गतघटिभिरथांतरमालवा
६० विनिहितानि खिलर्क्षघटीहृताः। लव मुखेन युतोगत खेचरस्तदपि वक्रगतेर हितास्फु
टः ४० खखवियग्देजवेदमिताः कलाः ४८००० दिनघटी खलु सर्वघटीहृताः अथशरा
द्रियुगे ५४५ रहितः शाको व्यपहृतः खरसै ६० रयनांशकाः॥४१॥ इति यत्नसाधनं॥ सूर्या
वर्षसमुद्भवोनहि भवेजन्मार्कतुल्यो यदा तद्या विहृतं तयोश्च विवरं लब्धं च तीनान्वितं
वर्षाविन्नाघटीपलेषु सततं वर्षार्कतो नाधिको जन्मोत्थो द्युमणो हि वर्षसमयः स्वेवं भवेत्स्फु
टः॥४२॥ अथ लग्नसाधनं॥ लंकोदयाः कुंजरशैलदस्त्र २७८ गोखेटदस्त्रा २९९ त्रिरदा ३२३

५

विनाप्यः हीनाश्च राशैः क्रमतः समेताव्यस्तैर्विलोमाभवनोदयास्युः ४३ तुलादितः षड्विलो
मतः स्युस्त्रिस्था ३ क्षभासा निहताः क्रमेण दिग्भि १० र्गजैः ८ सत्रिलवाद्विभिश्च २ चराख्यखं
डानि पलात्मकानि ४४ अयनवलेयुतार्काद्बाहुराशेस्तु संख्या चरसकलयुतिः स्याद्भोग्यखं
डान्ना घातात् गगणगुण ३० विभागैर्युक्चरं स्याद्दणं स्वं भवति च खलु सूर्यो गोलयोस्तु सलो
घं ४५ युक्तो विहीनाश्चरखण्डकाभिः पञ्चेन्दु १५ नाड्यः क्रमशो भवेतां द्युरात्रिखण्डे खलु सौम्य
गे केऽस्मिन्यथा तत्परिकल्पनीये ४६ भानोर्भोग्यलवा निजोदयपलैर्निघ्नाः खरामै ३०र्हृ
तास्तद्भोग्यं तपनस्य चेष्टपलतः शोध्यं च शेषांस्य जेतत् न सन्ध्यादुदयान् खराम ३० निहितेऽशो
षं त्वशुद्धोद्धृतं तत्पूर्वैर्भवनैर्युतं क्रियमुखैर्लग्नं च लङ्कोन्नितं ४७ स्यादल्पकालोऽरविभोग्य
नस्तु निघ्नः खरामै ३० निजमोदयासं फलं रवेरंशयुतं विलग्नं स्पष्टं च रात्रौ हि सषड्भसूर्या

त्॥४८॥ अथ चरखण्डलग्नसाधनं॥ भक्तं व्यस्तविनाडितः परिहरेत्सूर्यस्य भुक्तौ तथा कास्त
त्वा कृत्वा स्फुटदयांश्च शून्यभवने ३० निघ्नत्व भुक्तात्मकं शेषं भोग्यभतस्य तेन च लवैर्हीनं
विलग्नं स्फुटं व्यस्तं स्याद्दिवसावशेषसमये भुक्ताः स्वषड्भार्कतः॥४९॥ अथ भावसाधनं॥
घस्त्रार्द्धात्खलु जातकालजनिता नाड्यो विशोध्या नतं पूर्वं स्याद्दिवसार्द्धतो गतघटीतुल्यं
नतं पश्चिमे प्राग्भागे क्षणदावशेषघटिकायुक्ते दिनार्द्धे नतं तत्स्याद्भुक्तघटीयुतं दिने
दले स्यात्पश्चिमे तद्विदो॥५०॥ प्राक्पूर्वनतात्सदृणसंयुतं कथितं खलं कोदयैः यद्वेल्लनं तद्द
शमाख्यं क्रमतनुः प्रसंज्ञं तासां गमं वेश्मं स्याद्दिनतात्मलंग्नस्य भयुक्लग्नं च पूर्वाभि
धं लग्नं ज्ञेयं भुग्नस्ता विशोध्य लब्धं जायाभिधास्समं॥५१॥ औकाशार्द्धशमं विलग्नवर्ज्जा
नस्य लघुएणांशौस्तेनायुक्तानि द्विशराष्टलाभभवनान्येवं नतस्तेयुतः शमांशासहजा

रिपुल्यभवनान्यंस्यंक्रमात्साधयेत्संधिः स्यात्खलुभावयोगदलतः स्पष्टोविलग्नादतः ५२ ग्रं

थांतरे संधेरूनाधिकाभोगाग्रहस्यन रव२० नाडिताः भावसंध्यंतरेणासंफलंतस्य विशोप

काः॥५३॥ अथ नतविनाभाव साधने॥ लग्नाद्दात्रिलदलाद्विलग्न विधिनालंकोदयैर्लग्न तो

लग्नंतत्सुखसंज्ञकंचमदलोयत्तद्घस्त्रखंडात्खभं साध्यंधस्त्रदलेखभंचगदितंसूर्यो र्ध्व

रात्रेरविः स्यात्पूर्वोन्नतकालतः क्रमतउल्लंकोदयैर्बंधुभं ५४ खेटेभावसमांशकेचगदितं

पूर्णंफलंभावतोहीनेचेदधिकेऽनुपाततवशात्तोल्लेयंबुधैर्भावजं संधेहीनतराधिकग्रहके

लाभावस्वसंध्यंतरैर्भक्तान्याथविशोपकादिविस्तदालब्धेत्रिशभिर्भाजिते ५५ आगामि

संध्येरधिकेफलंस्यादागामिभावोऽवमत्रसंध्येः हीनेच खेटेगतभावजातंपूर्णफलंभा

वसमांशकेषु ५६ भावग्रहे लेस्वल्पतरेस्वसंधेः स्वल्पांशकेनन्दतभावजातं व्यस्तंच

७

तद्व्यस्तगतेग्रहाणां ज्ञेयं हि सम्यक् सुधियादरेण ॥५७॥ इति भावसाधनं ॥ दृष्टालीनतनुः खगो य
दि भवेद्व्यामाधिकोद्दिर्हतः षष्ठिभ्यः परिशोधितः खचरदृक्रूपाधिकः कुनितः तन्मागादलिताच्च्येव
दहरितो वेदाधिकाढ्यान्वितो हीनः पंचयुगाच्छरक्षेरहितः पंचाधिको द्विर्हतः ५८ षष्ठोनो रसभा
धिकः करहतः षष्ठिच्युतश्चाधिकः ससोनः स्वदलान्वितो गज ८ गुरु ९ व्यष्टोर्द्धितांशोनितः बाणा
ब्धेस्त्रिवतोधिको भवविपुक्रूद्दिघ्नः कलादादशाः स्पष्टास्याः खलु वर्षवेषसमये चिंत्यं हत्थं फ
लं ५९ पादं त्रिरुद्रे सदलं खतुर्यपादत्रयं नंदशरे भोगाः परयंति हर्लं समससमे च फलांतेसद्बु
नाभिधास्ये ६० परस्परं एकर्क्षगे स्यात्सबलोप्रधानात्स्वस्थानतो लाभकरो हि दृष्टिः मित्रात्तथाभ
पतितोर्थदात्रिसुवस्त्रसौख्यासिकरीनराणां ६१ परस्परं सप्तमगारिभेदं युद्धं विवादं प्रकरोति दृ
ष्टिः त्रिकोणगा वित्तविलाससुप्रं मित्रात्तथा बंधुजनाच्च सौख्यं ६२ खतुर्यगे मित्रविरोधकष्टं

७

13

गुत्पारिभेदं प्रकरोति दृष्टिः त्रिरुद्रगेऽस्नेहमतिप्रसादं सुखार्थलाभं बलवृद्धिनं च ६३ क्रूरग्र
हाश्चेत्खलु दृष्टिसंस्थाः पापेतराः सौम्यदृशिस्थिताश्च यच्छति तद्दृष्टिभवं यथोक्तं फलं तदृष्टेश्च वि
लोमसंस्थाः ॥६४॥ इति दृष्टिफलानि ॥ अथ पंचवर्गीचक्रं ॥ अथ प्रवक्ष्ये खलु पंचवर्गीचक्रं ग्रहा
णां बलसाधनार्थं यद्वीर्यतो भावफलानि न्यूनं ज्ञेयान्यथोच्चे खेचराक्रमानि ९५ स्वक्षेत्रं च निजमु
च्चकं च परतो हद्दा त्रिभागास्ततो नंदांशाः स्थिति खेचरे निगदिता वर्गाः पृथक् पंचधा खेटस्तेषु गतो
भवेद्बलयुतस्सत्केसु तं निर्बलो विज्ञेयो विबुधैः स्वसोहिनी रिवले निंद्यो रिगे हादिके: ९६ भवनपाः
क्रियतः कुजभार्गवाज्ञविधुसूर्यशशांकजभार्गवाः कुजसुरेज्ययमार्कजमंत्रिणः खलु भवंति ततो
लवपा इमे ९७ रवेरुच्चं घस्रपतेरजो दशलवे १० चंद्रस्य रामे ३ वृषो भौमस्याष्टयमे २८ मृगस्तिमि
थि १५ लवैः सौम्यस्य कन्यागतं बाणैः ५ कर्कगतं गुरोर्नगयमैः २७ शुक्रस्य चोक्तं भृषं मंदस्या

भ्रुयमे २० लवैर्निगदितं स्वोच्चं तुलासंज्ञकं ६८ उच्चान्नीचपदं भवेन्नग ७ गृहं मूलं त्रिकोणं
रवेः सिंहः अन्ययमे २० वृषोहिमरुचो २० भौमस्य मेषोन्नरेवेः २० कन्याभं रवयमे २० बुधस्य च
गुरोभागैर्नरैवै २० श्चापमं दैत्यज्यस्य तुला रवनेत्र २० लवकैर्मंदस्य कुंभोन रैवेः २०॥६९॥ अथ
हद्देशाः॥ तर्का६ गे६ म८ न्द्रो२ र५ षवः५ प्रथमभे हद्देशकाः कार्मुके स्युः सूर्ये १२ षु५ युगो४ षु५ साग
र४ मितास्तेषामधीशाः क्रमात् वागीशास्फुजिदिंदुदेहजकुजाः सौरिस्तथा जित्ममेष ६ द्धतर्के
६ षु५ नग ७ त्रवश्च ६ द्रस भेगा ७ शा१० ब्धिससा ७ ब्धिर नः ७० विद्वेत्यस्य तुरेज्यमंगलयमा
स्त्रिंशाशापाश्चाब्धि४ मेससां ७ गह्तु ६ नगा ७ व्यय४ श्चवत्सुभे ८ ससा ७ ब्धि४ सर्प ७ षु५ षट् ६ मा
हेपास्फुजिदिंदुजेज्य शनेयागोमे लवाः संमताः सार्क ८ गा६ ए८ शरा५ नयो३ थ सितविल्जीवा
र्केजारैश्चराः ७१ कुंभे ससं ७ रसा ६ द्रि ७ मार्गण ५ शराः सोम्यास्फुजिद्देवराट् ६ स्यारा र्के

15

सुताघटेरसदृगजाः८ ससा७द्वि७दस्त्री२लग्नाः नाथामंदबुधेज्यशुक्रकुसुताहद्दांशकाः सिंहभे
तर्के६ष५द्वि७रस६र्त्तवो६गुरुसितौमंदज्ञौभौमामृगे १२ ससा७गा९ष८युगा४व्यय४स्स
थलवाज्ञेज्यास्फुजिभ्रास्करिक्षोणीजास्तमितेपतंगनिगमाश्वा४स्त्र्य३का९भ्विनो२धीश्व
राः शुक्रेज्येंदुजभौमसूर्यतनयाहद्देश्वराः स्युस्तुले हद्दास्ताजिकसंमतेनिगदितास्त्रिंशांशकाःसू
रिभिः॥१८॥ अथनवांशाः॥ मेषाद्याः क्रियचापकुंभरिपवः कर्कालिमीनास्त्रयः कर्काद्यास्त्वथकुंभ
जित्मवणिजेः स्रोत्कास्तुलापूर्वका गोकन्यामकरोमृगाद्ययुग्मे नंदांशकाः संमताबत्वंशाः क्रम
नाः कुजार्कभृगुजाः सौम्येंदुसूर्यात्मजाः १४ नाकेशास्थितभौमतिग्मरुचयः शुक्रेशरात्रीश्वरा
मंदेज्यक्षितिजास्तनोरशुक्रबुधाराजीशामंदेज्यकः भौमार्कीभृगुजाबुधेंदुरविजाजीवारघस्त्रेश्व
रादैत्येज्येंदुजेराशिपायमगुरुक्षोणीजकामेषतः॥१९॥ अथमित्राणि॥ मित्राण्यपारशांशकश

कस्यचिद्वा भौमार्कदेवार्च्यिता जीवार्कक्षणदाधिपाः शनिसितौ चंद्रार्कभं नंदनाः सौम्यदित्यभवौ
शशांकजसितौ मंदज्ञशुक्रा इमेस्सूर्यात्सुरिपवस्त्वनाजिकमेते शेषा बुधे स्योदिताः ॥७६॥ अ
थ बलानि ॥ त्रिंशांशा निजभे स्वमित्रभवने षड्भागकाः शत्रुभे सार्धाः सप्तलवस्त्वसौ ग्निलवगेभ
३० गास्त्वपंचेंदवः १५ ॥ त्रिंशांशा निजमित्रगे नगलवाः ७ सार्द्धाः हृताः शत्रुगे पादोना स्वगुणांशा
के दशलवाः १० बाणांशकापित्रगे ७७ द्रेष्काणे सदलायमाः २।३० स्वरिगते नंदांशके ४५ स्वेशा
राः ५ नंदांशा निजमित्रगे यमलवाः सार्द्धाः २।३० स्वेरौ तद्दलं रेवटे नीच विवर्जिते षडुदधिके चक्रो
२२ त्येगे तल्लवाः १० भक्तानंदमितैर्लवादिरवचरे भांकबलं तुंगजं ७८ युक्तं रेवटबले न पुष्कर
गते स्यष्टं बलं स्याद्ध्रुवं वेदा ४ संच विशोपकास्त्विति सदावीर्याद्दबालत्र्यतः बाणैर्नष्टबलो श्रते
दशा १० मिते मध्ये विशोपे स्त्वतश्रेष्ठो घरत्र १५ मितेः सुखार्थजनदः प्रोक्तः खदस्वैः लवैः ७९

इति बलाध्यायः॥ अथ द्वादशवर्गीचक्रं॥ अथोच्यते द्वादशवर्गचक्रं प्रोक्तं खगानां बलसाधना
र्थं यद्वीर्यतः खेचरभावजोत्थं श्रेष्ठं प्रवीणैः सहसत्फलं च ८० मं भार्द्धं त्रिव श्च वेदलवको बा
णांशकः षड्लवः सप्तांशो ष्टलवस्ततो नवलवो दिक्रुद्र सूर्यांशकाः एवं द्वादशवर्गिकानि गदि
ता राशीश्वराश्चोक्तवत्स्युर्यै दो विषमे गृहे समगृहे होरेशांशकाः कार्याः ८१ आद्यत्रिभागे
भवनाधिपः स्यात्सुतिस्ततः पंचमपो द्वितीये प्रोक्तस्तृतीये नवमाधिनाथो वेदांशका नांपत
यः स्वकेंद्रात् ८२ पंचांशनाथाः कुजमंदजीवज्ञभार्गवाः स्युर्विषमे च युग्मे व्यस्ताश्च ते यु
ग्मगृहे तु लाद्या षष्ठांशपाः स्युर्जगृहे क्रियाद्याः ८३ सप्तांशकाः स्वोजगृहे स्वगेहा द्युग्मे तु ता
द्यूनगृहात्सृजांशाः शीर्षत्वजाद्याः स्थिरभेषु चापात्सयुग्मेषु सिंहात्कथिताग्रहेज्ञैः ८४ मेषा
दे घटाच्चापभतो घटाच्च सिंहात्त्रिभाद्दिग्लवपाहि षष्ठ्यां भानां घटाद्व्यर्थं वदत्र चक्रे रुद्रांश

कानामधिपान्प्रवच्मि ८५ मेषात्‌ वृषात्कुंभभं तोमृगाच्च चापात्‌ मृगात्‌ सभतोरसाच्च
सिंहाच्चतुर्थान्मिथुनाद्वृषाच्च स्युर्लग्नादंशानि त्रिभाक्चित्स्युः ८६ मित्रोच्चे सौम्यागृहे
णोस्तः पन्यानि द्यास्तु नीचारि रविलग्नचाश्च एवं ग्रहाणां शुभपापजातं न स्यात्तराद्यादधि
कं विलोक्यं ८७ शुभाविशेषे खचरो बलिष्ठः स्यान्निर्बलो दुष्टफलाविशेषात्‌ वीर्यानुसारात्ख
लु भावजातं शेषं फलं वा प्रलजं रत्नायां ॥८८॥ इति द्वादशवर्गीचक्रं ॥ अथ हर्षस्थानि चक्रांगि ॥
सूर्यादितो हर्षपदानि खेट ९ त्रि ३ तर्क ६ चंद्रे १ श ११ रांश ५ त्र्य १२ संस्था ग्रहान्निजोच्चे स्वरवि
ले निरुक्तो मुनिप्रवर्यैः स्वगृहं ग्रहे च ८९ विकं चिकंलमवेरात्रिरुक्तं पुंस्त्री ग्रहाणां खलु
हर्षसंज्ञं सूर्यारजीवा नरखेचराः स्युः स्त्री खेचरो शुक्रनिशीश सं सौ ९० ॥ इति चेत्वारि ह
र्षस्थानानि ॥ अथ योगः ॥ रविः शशा ओ १५ स्तपनेः शशांको लवे मंत्रिणौ वसुभिश्च ८ मा

गेः त्रभागगो सस ७।८ लेवेर्न भोगे ९९ देवेज्य मंदो प्रयुतिं करोति ९१ शीघ्रग्रहश्चो केलवे
श्च मंदात् हीनोथ लिप्ताद्यैः विलिप्तिकाभ्यां तुल्योथवा चेद्ध्रुव मित्थशालो योगस्तथायं ख
लु मुत्थशीलः ९२ शीघ्रग्रहो मंदमं खगाद्यदा ग्रे प्रयाति रूपांतर भागकेन तदेशराफः
कथितो महद्भिः कष्टप्रदो सेमुसरिफकोवा ९३ शनैश्चरश्चेद्धि खगेन साई करोति नूनं
यदीत्थशालं वो हूल कार्यं कथितं त्रिभेदैः संपूर्णमध्याधमकैः समस्तम्भिः ९४ मित्थस्वगे
ह्यो गतो प्रधानं मध्यं स्वगेहारिगृहादि गोच नीचारिगेहोपगतो निरूतं कंबूल कंचेद
धमं ग्रहज्ञैः ९५ यदीत्थशालः खचरैश्च सौम्यैः दृष्टोदलोप परिरक्षणीकश्च दत्ते तदा सोवि
विघ्नं विलासं धनागमं करोति वि।वर्द्धनं चा ९६।। इति योगत्रयं।। अथ वर्षेशार्थं निशादिनाथाः
।। सं नौ सु रे रं पं शौ शौ मेषादितश्च हरि भाद्वधनुषश्चतुर्णां सूर्या स्फुजिछ नि सितादिनपाश्च

भानां राज्ञो सुरेज्यज्ञाविसौम्यकुजाः सदेशाः कोजारना कपतिर्वदितचंद्रमास्तुः ९७ घस्रेदि
नाधिपसदेश्वरयोस्तम ध्येयः स्यात्तयोबलयुतस्त्रीभयोर्निरुक्तः राज्ञो सदाधिपनिशेश्वरयो
र्बलाढ्यो ज्ञेयो तु वैस्त्रिभपतिः खचरानितांतं ९८ अथवा घस्रेशास्फुजिदेसुसचिवाजी
वेंदुचंद्रात्मजामाहेयार्कजभौमदेवगुरूवश्चंद्रस्त्रिभेशा इमे घस्रेजीवविधुज्ञभौमतपनाः
शुक्रार्किशुक्रार्कजौ भौमेन्यक्षणदाधिपा निशिगतलग्नेत्रिभेशाह्यजात्॥९९॥ अथवर्षेश
निर्णयः॥ अथ समाधिपतेः स्फुट निर्णयो न हि कृतो यदि वर्षनिवेशने कथमिदं फलम
त्र विनिश्चितं भवति सोयमतः प्रविचार्यते १०० जन्मांगपांगपतित्रिभेशास्तथाधिपोर्को
दिवसे निशींदुः अमीषुवीर्ययुतो बलमंपरेय श्चैवं वर्षपतिः स चात्र १ यद्यल्पमंबलवोग्र
हेंद्राः पश्यंति चेत्थं च दिवोकसांहि मध्ये धिकोरो बलतो स्ति यस्य तस्यादयः योगादितं प्रवीणैः
२ द्वकूतुल्यैकत्वे सबलो व नाथः स्यादीयसाम्ये पतिश्चतेषां दृष्ट्योधिकोयः कथि

नोदगादि साम्यंथितेशोऽब्दपतिश्च सम्यक् ३ मासप्रवेशोद्भवलग्ननाथो मासेप्रभुःसंप
रिकल्पनीयः द्युवेशलग्नस्य पतिर्दिनेशो विवेचनीयश्च शुभाशुभार्थं ४ प्रश्नांगपो वर्षपतिःप्र
कल्प्यस्सूर्यश्चरौ जन्मविलग्ननाथः मुंथाधिपःप्रश्नविलग्नतश्च त्रैराशिकोधस्त्रपतिःपुराव
त्॥५॥इति वर्षेशविचारः॥अथ वर्षेशफलं॥ अथ रवेः षष्ठांत्यविवर्जितोऽस्तरहितःसन्मित्रव
र्गेस्थितः पुष्टः सोविविधंसुखंधनचयंपुत्रार्थमित्रादिकं मध्येमध्यमिदं करोतिविफलं
नो नष्टरिंभीतिहत् द्रष्ये रोगभयंनृणां धनहृतिस्यात्स्वीयपाकोदये ६ अब्दाधिपेप्रबरमलेऽस्य
बलेप्रतिष्ठा प्राप्तिस्ततो निजकुलेबहुराज्यलाभः स्थानांतराद्भवति भूधनकीर्तिमत्रलाभ
स्तथा बहुसुखानि रिपोर्विनाशः ७ पुत्रात्स्वपास्त्वजनतोल्पसुखंनराणां स्यान्मध्यवीर्यसहि
तेद्युमणौ समेशे कुर्याद्दरित्वमपि रोगभयंविवादं लोकेस्वथान्नृपजनैःसतचाल्पवैरं ८

नष्टे रवौ भवति वैरिजनादिरोधो रोगागमो निजजनाद्भयमुग्रकं स्यात् द्रव्यक्षयश्च सुततः कलहः स्वमित्राद् मध्ये च दूरगतिदोऽस्य जनापवादः॥९॥ इति रविः॥ अथ चंद्रः॥ वर्षाधिपो हिमरुचे परिपूर्णवीर्ये वित्तागमो न्नृपजनान्नृपते धनाप्तिः सौख्यानि चात्र विविधानि करोति तः स्युश्चेतादिवस्त्रवशातः प्रकरोति लाभं १० मध्यो विधुर्नृपजनान्नृपतेर्विरोधं वित्तक्षयं स्वजनः प्रकरोति वैरं स्त्रीवर्गतः सततमल्पसुखं स्वशात्वं वैराग्यदुःखजननं भयमुग्रकं च ११ नष्टे भयं भवति वातकफादिपित्तवैरोदयो निजकुन्नृपतेर्विरोधं स्थानांतरादरिभयं वसुखं च दग्धे मत्स्यो भयं तनुमतां हिमगोस्वपाके॥१२॥ इति चंद्रः॥ अथ भौमः॥ वीर्यान्विते क्षितिसुते नृपतेर्धनाप्तिः सेनापते रिपुगणाद्विजयो रणाश्च सेवाधनं भवति मार्गवशाच्च सौख्यं स्त्रीसंगतेश्च विविधं सुखमत्र विंद्यात् १३ मध्ये कुजे भवति लोत भयं विवादं कुर्यात्स्वरात्व मरिवलं गमन

स रोगं वैरोदयं नृपजनेषु धनक्षयं च चौराद्भयं स्वजनतोऽथ वा नराणां ॥ १४ चौराग्निशस्त्ररुजज्वलनभीसमीपे तिलाभः पित्तोदयो भवति पादमुखाक्षिदेशे दुष्टाद्भयं निजजनादिधनधान्यनाशः स्त्रीपुत्रमित्रकलहं क्षितिजो विनिष्टे ॥ १५ ॥ इति भौमः ॥ अथ बुधः ॥ वर्षाधिपे शशिसुते सबले निसौख्यसेवाधनं रविलनतः पठनादिलाभः स्त्रीमित्रसौख्यमतुलं सुततश्च रत्नं वालिस्यतो धनसमागमनं विलासः १६ मध्यस्थे सोमतनये निजवाक्यदोषात्सर्वार्थहानिमसुभं प्रकरोत्यनर्थं स्त्रीपुत्रमित्रकलहः सुखमल्पमत्र वैरोदयं नृपजनात्स्वजनाच्चेतद्रुत

१७ नष्टे बुधे नृपभयान्तसक्षितोऽश्च क्लेशोदयः स्वजनतोऽर्थलयो विवादः चौराद्भयं हृदि गलामयदुःखने चेपीडा भवेन्निरिवलमध्यमकं च दग्धे ॥ १८ ॥ इति बुधः ॥ अथ गुरुः ॥ दैत्येज्यो तो बलयुतः प्रमदाविलासं कुर्यात्स्वमित्रसुततो विविधं च सौख्यं वित्तागमं नृपतितो विजयं रिपूणां विश्वासतो सलेलोकजनेषु शश्वत् १९ नाकेश्वरस्य सचिवोऽल्पबलोनितां तं

या

१

१३

लोके विरोधं मशुभं प्रकरोति नृपात् वैरोदयं स्वजनतश्च परे विवादं कुर्यात्तु रात्रम पि चौर भयं
सदासौ २० निंद्यो गुरौ खलु भवे न्नृपतेर्थ नाशो धर्मार्थ हान्यसुखवं धुविरोधपीडा पादाक्षि
गुल्फ जठरे जघनेषु नूनं वातार्ति कच्चरिभयं तनुसंक्षयं स्यात् ॥ २१ ॥ इति गुरुः ॥ अथ शुक्रः ॥
देवेश्वरस्य सचिवः परिपूर्णवीर्यो दद्यान्नृराज्य वनितासु विलास हास्यं आरोग्यताखिल विला
ससुखं च लाभं क्षेमप्रतापविजयं सुमतिं सदासौ २२ मध्यो नृपात्स्वजनतः खरितो विरोधं श्लेष्मार्ति
हृद्व्यसुतदारभयं च कष्टं कार्यार्थ हानि मपि देहरुजो दयं च कुर्याभसौरव्य मिह स्त्री
य दशाप्रवेशे २३ निंद्यो सिते ऽखिल जनात्कलहो नितांतं स्याद्वरितो नृपजनाद सुखं त्वम
त्र सौख्यार्थ हानि रति शोक भयं विवादाद अन्यैः स्वपाक विषये मतिसंक्षयश्च ॥ २४ ॥ इति भृ
गुः ॥ अथ शनिः ॥ मंदे ऽधिक बले वनपर्वताश्च लाभो ग्रमतान्भवति भूरुहरोपणाच्च वाणिज्य
संरसस्य वनितार्थ समागमं म्लेच्छात्खलान्निजनात्सुखमत्र नूनं २५ शनिः स्वसनराजज

मध्यः १

१३

नादिरोधं वातार्तिरुग्जठर दृष्टिमलेषु नेत्रे दारिद्र्यदुःखमरिपीडनमत्र कायात् वैराग्यमर्थपरि
हानिसुहृद्विरोधं २६ निंद्येतु सर्वमधमंतु सुहृद्विपत्तिः कष्टं क्रिया विफलता निलरुकू विकारः
कार्यार्थहानिरथपुत्रसुहृद्विपत्तिर्दग्धेर्कजे मरणं तदिभयं नराणां २७ सम्मोध्येके षु परिमर्द
बलं खागानां हद्दात्रिभागकनवांशगतेषु मध्यं नीचारिवक्रमसहितेषु च दग्धवीर्यमस्तारि
गे भवति नष्टबलं समंतात् ॥ २८ ॥ इति निशाने ॥ इति ताजिकसारे वर्षफलानि ॥ अथ मुंथाभावस्य सा
विस्तारं फलं लिख्यंते ॥ अथ मुंथास्पष्टीकरणं यातावृसंघाद्दविभि १२ र्विभक्तो हृछेषं थिते चा
द्य जन्मलग्नात् जन्मांगभागैः सहितो लवाद्या नाकालिकासा मुगतिः प्रयुक्तो २९ मुंथांग
तिः प्रतिदिनं शारलिसिकाश्च यस्थानगा भवति तन्द्भवनेशाईशाः सौम्यान्वितास्यपतिनासहि
तोक्षितावा सौख्यार्थदा विविधाकार्यकरी निरुक्ता ३० प्रश्नांग कालेर्कलवैः चारांको यावत्ते
माणैः प्रभवेस्य मुंथान्नतुल्यमेः प्रश्नविलग्नमानात् केचित्सुखात् संप्रवदंति नसोः ॥ ३१ ॥ अथ

धः मतिभावकृत्लानि॥ लग्नस्थितेबंधाथा प्रकरोति सौख्यं नृपप्रसादं विजयं रिपूणां तथोदयं बा
हुबलं प्रतापं वृद्धिं विलासं धनलाभमुग्रं ३२ मुंथा धनस्था धनधान्यलाभं करोति मिष्टान्नस
मागमंच सर्वार्थसिद्धिं निजबाहुवीर्यात्सुखोदयं मित्रसुतोदयंच ३३ लोका जयं निजज
नाश्रय सहोत्थ सौख्यं ददाति हर्षे कलकार्यसमृद्धिदात्री सत्संगतिश्च सबलं तनुते तिमे
त्रीमुंथा प्रराक्रमगता नृपतिप्रसादं ३४ वित्तक्षयं रिपुजनादसुखस्य वृद्धिं वैरोदयं स्व
जनेषु कुर्यात्तु उत्सानिहर तद्दिच रोग विवृद्धिदात्री तुर्ये थिहाविविधरोगभयानि पुंसां
३५ प्रतापमाहात्म्यसुराज्यंनंच सद्बुद्धिवृद्धिर्यशसः प्रवृद्धिः वित्तप्रलाभो जनताप्रसादः
त पुत्राप्ति सौख्यं सुंथिहायां ३६ नृपाद्भयं चौरभयं दृशातं निरुद्यमत्वं रिपुजं भयंच का
र्यार्थहानिं कुमतीष्टवैरं षष्ठे थिहा दुष्टतरं विदध्यात् ३७ सौख्यार्थनाशो वनितादि कष्टं
चिंतामनो मोहमनल्परोगं क्लेशोदयं स्वेष्टजनेषु वैरं यशोविनाशो मदने थिहायां ३८

दुष्टामयार्तिधनधान्यनाशो विपक्षभीतिर्व्यसनाद्विमोहः कांते विनाशः स्वजनेषु पीडा नृपान्द्भयं
चाष्टमगे स्थितायां ३९ धर्मार्थलाभं स्वजनेषु मैत्री नृपोत्तमैः प्रीतिमहोदयं च प्रमोदभाग्यो
दयकार्यसिद्धिं पुण्यापगे स्थाप्रकरोति सौख्यं ४० मनोरथाप्तिः स्वजनैश्च सौख्यं निजेष्ट
मैत्री स्वजनपकारः भूपालप्रसादो दशमे स्थितायां पुण्योदयः स्याद्विपुलं यशश्च ४१ सु
खार्थलाभं शुभबुद्धिवृद्धिं मनोरथाप्तिं नृपतिप्रसादं निजेष्टसौख्यं मनसि प्रहर्षं करोति
मुंथा भवगा वशित्वं ४२ निरुद्यमत्वं निजमित्रकष्टं अनेककष्टं नृपतभयं च धर्मा
र्थनाशो रिपुचौरभीतिः स्वमीष्टपीडा व्ययगे स्थितायां ४३ मुंथा यदा जन्मनि चाधुरं ध्रस
सांस्यगा यत्र गता समांगे तद्भाव लाभं प्रकरोति सौम्यैर्युतेक्षिता सा शुभदा न दास्या ५४
मुंथा सूर्ययुता करोति नृपतेः सौख्यं महत्स्वामितां सौमाद्या धनधीप्रदा कुजयुतार कार्ति

२५

कष्टप्रदा मंदाढ्यात्वनिलाभयार्तिर्जनकादुःखप्रसादाम्बरी स्त्रीपुत्रोत्सुखदासुरेज्यसहिता
शुक्रान्विता स्यात्तथा ४५ सौम्याढ्याधनधीप्रदा स्वपतिनायुक्ताशुभा कीर्तिदा देवेज्येन वि
लोकिता थसहिता शुक्रेण धर्मार्थदा राज्ञा सोपगता करोति सततं भूपप्रसादं न्वणां तत्सुख्या
नुगतारिभीति कलहान्दोरव्यस्वदेहे ध्रुवं ४६ राहोर्मुखं भोग्यलवोनिरूक्तं षष्ठं हि मुंको
स वलग्नकस्य अस्तं च तस्मान्ददितं च पुच्छं तत्रस्थितं थासभयार्तिदात्री॥४७॥ इति मुंथा
प्रतिमासफलं॥ अथारिष्टविचारः॥ शुक्रेज्यौ यदि वास्तगौ हिमरुचिर्न्नीचानुगश्चेत्तदा कुर्यु
र्व्याधिभयं वियोगमशिवं कष्टं महद्दारुणं। छिद्रेशाय दिलग्नगस्तनुपतिः छिद्रानुगश्चेत्त
दा दृष्टोतो खलखेचरैर्निधनदो शास्त्रोक्तयं स्यात्ततः ४८ मुंथा जन्मविलग्नपोयदि ततः सूर्य
स्य बिंबानुगो दृष्टो सूर्यसुतेन ताजिकमते सर्वार्थनाशो मतः। जन्मांगाद्यदि हाय नो भ्दवत
नुः स्यादष्टमं संयुतं दृष्टं वा मुथहेश्वरेण सततं कुर्याद्विनाशं भयं ४९ लग्नास्तौ यष्ठे

२५

२९

गोहिमरुचिर्दृष्टः खलैः संयुतः स्यादिष्टं प्रकरोत्यसौ च गुरुणा नो वीक्ष्यते सद्दृशा कष्टं स्याच्छनि
नाकुजेन दहना च्छस्त्राग्दयं वाविधुः संदृष्टः करोति सौम्य खचरैः सौख्यः प्रदः शोभनः ५०
लग्नेशो यदि चाष्टगः क्षितियुते नालोकितः संयुतः सौम्ये स्यायदि चास्तगो तु विविधापीडा भ
यं शस्त्रतः लग्नं पापखगांतरे यदिगतं घूनं तदा मृत्युदस्त्वीपे मृत्युरुखांत्यवैरिभगतेः स्या
द्देहीनां संक्षयः ५१ मुंथा दुष्टयुता षडंत्यवेश्मगा शस्त्राग्निभीतिप्रदा दृष्टा सूर्यसुतेन सा ब्ध
समये वाता निदाप्राणिनां सैसाष्टारिसु खांत्यगा जननभा च्छिद्रोपगा द्देथिता दृष्टा सा खब
लखेचरैर्निधनदस्त्या संयुता वा ध्रुवं ५२ चंद्रांशास्तनुपोथवाष्टमपतिर्लग्नाद्ययोगाष्टगः
कुर्या न्मृत्युरुगाग्निभीतिकलहान्‌ जन्मेश मुंथाधिपो लग्नाच्चाष्टमगो रुगाग्निजननो दुष्टे
क्षितो मृत्युदो लग्नेशो यदि चाष्टगस्तनुगतः छिद्राधिपोरिष्टदः ५३ रंध्रेशोथ विलग्नपो

पटि [illegible] र्णे माध्ययांगा द्गो नासौम्यैरवलोकितो निधनस्थनुं थाधिपोवा तथा एते रिष्टकरा बु
धै निगदिता योगाः स्वशास्त्रेभ्द्वा अन्यैतोजिनशास्त्रेतानि जधियाज्ञेयाः सपादोसदा॥५४॥इ
ति तात्रिकसारे रिष्टाध्यायः॥ अथ रिष्टभंगाध्यायाः॥ देवेज्यः खलु केंद्रगः शुभखगैर्युक्तोथ
वालोकितो हन्यात न्निखिलं पुरा निगदितं रिष्टं शशांकोभ्दवं सोम्याः कंटकगास्त्रिकोणभव
गा लग्नेन्निहंतुध्रुवं रिष्टं यग्रहजं न्नणां तनुपतिः केंद्रानुगो वा न्नथा ५५ पापालग्नविलग्नतोहि
मरुचेर्वारित्रिलाभास्थितो हन्या सोम्ययुतेक्षितोहि सकलेरिष्टं पुरा भाषितं वीर्याढ्या पृवि
लग्नपः शुभयुतः केंद्रानुगो सोहरे त्तरिष्टं सोम्ययुतेक्षितोव्दसमये जीवस्तथावाभ्युतः ५६
तनुपतिर्यदि केंद्रगतैः शुभैर्बलयुतैः सहितोथविलोकितः हरति रिष्टगणं बहुलं सुखं वेनि
त्तरदशाविषयेस्य करोतिच ५७ यदि सुरेशगुरुः खलु केंद्रगैः खलखगैः सहितोन चवि
क्षितः अपकरोति न दामरणं न्नणां सततमत्र सुखं तनुते न नो॥५८॥इति रिष्टभंगाध्यायः॥

अथ राजयोगाध्यायः वागीशो बद्धविलग्नतस्त्रिभगतो जन्माधिपश्चांबुगो हन्याद्वैरिगणं तदा बलयु
तो दद्याच्च वित्तं बहु वैरेभशेषायदि वेश्मगो बलयुतश्चेत्सौम्यखेटैर्युतो दृष्टो वा प्रददाति सौख्यमतु
लं जायादिमित्रोद्भवं ५९ पुण्येशो बलसंयुते धनपतौ वीर्यान्वितसगृहे दृष्टे गाविपुते विलग्नभ
गते ज्ञेयं गजांतं फलं राज्यं वा विपुलं धनं शुभजवैरश्चैर्विलासः सुखं जायेशो तनुभावगे चखुर
णयुक्तेथवा लोकितै ६० तन्वंतिक्षजार्कसूर्यतनया वित्तं हि लाभोपगा राज्यं बाहुबलेन तत्भुवित
लेदद्युलिशान्ममितं विद्वेवेज्यसितैःहतोद्धसमये चेद्दिष्यशीलस्तदा राज्यं संप्रददाति वैरिराशि
तं भोगैरनेकैर्युतं ६१ सौम्यैश्चेद्रचितोप्यसौख्यलखगैस्तर्कत्रिलाभोपगैर्हन्याद्वैरिगणं हि
तस्तितुरगैर्युक्तं हि राज्यं पुनः दद्युर्मदसितौ निजोच्चभगतौ वीर्यान्वितौ यच्छतौ राज्यं म्लेछजन
प्रसादजनितं सौख्यार्थभोगैर्युतं ६२ सकलसौम्यखगायदिकेंद्रगाधं भवपराक्रमशत्रुगताः

खलाः सुतधनं बहुलं मणिकांचनं द्युतिसुखं विसृजंति तदा नृणां ॥ ६३ ॥ इति राजयोगाः ॥ अथ राज

योगभंगाध्यायः ॥ नीचोपगा वैरिगृहोपयाताः पापैर्युताश्चास्तगता ग्रहेंद्राः हरंति राज्यं विपुलं नरा

णां तदा सुखं नास्ति नरस्य वर्षे ६४ दुष्टवर्गोपगाः पापाः सौम्याश्चेद्बलवर्जिताः अकुर्वंति तदा राज्यं

दुःखं कुर्वंति देहिनां ॥ ६५ ॥ इति राजयोगभंगाध्यायः ॥ अथ ग्रहभावाध्यायः ॥ लग्नादि भावानि ज

नाथयुक्ता दृष्टाश्च तेषां प्रवदंति यद्वत् सौम्यैश्च वा पापखगैर्विना वा तांस्तांश्च विमिश्राः फलमिश्रदाश्च

६६ गगनचारिपुपराक्रमलाभगः खरकरो घनसौख्यजयप्रदः मदनरंध्रसुखांत्यविलग्नगो

विविधकष्टभयार्तिकरः परः ६७ दिनपतिः सुतधर्मधनस्थितो धनसुतार्थसुहृत्क्षयकार

कः सहजवित्तसुतारिगतः शशी विविधसौख्यकरो धनदः स्मृतः ६८ निधनलग्नमदांत्यरि

पुस्थितो यदि विधुः खलु खेचरसुतेक्षितः यमकरं विदधाति तदा नृणां यदि न पश्यति देवगुरु

1

1

33

नृणां ६९ हिबुकगो हृदिरोगकफार्त्तिदश्चनविलासकरोगगनेविधुः हरतिपुण्यगतोमति
संचयंव्ययगतः खलुदैन्यकरोतिनृणां ७० तनुसुखास्तगतःक्षितिनंदनस्तनुभृतांचतनो
तनुतेव्ययतां निधनगो निधनंव्ययगोव्ययंभवतिशेषपदेषुधनप्रदः ७१ धनशुभार्थगतो
वसुहृत्कुजः सुतगतःसुतवित्तविनाशनः शशिसुतो व्ययरंध्ररिपुस्थितोधनसुखासिहरो
भयदो नृणां ७२ सहजकेंद्रघनांकसुतेस्थितोधनविलाससुखप्रकरोबुधः भवगतश्च
शुभः शुभखेचरैरेलैवयुतैःसहितोनिधनोमतः ७३ धनभवास्तजकेंद्रनवत्रिगःसुरगुरुः
सकलार्थसुखप्रदः निधनगस्तनुपीडनकारकोधनसुखार्थहरोव्ययसंस्थुगः ७४ भृगुसु
तोव्ययवेश्मि विनाशगो भवतिचेद्व्ययवैरिविरोधहृत् यदिचशेषगृहेषुसुखार्थदो धनचयंवि
दधातिसुखत्वदः ७५ व्ययास्तलग्नाष्टगतोर्कपुत्रोवर्षगतोसुखप्रनाशं करोतिपंचोपगतः
स्वपुत्रैः वैरंसुखार्थक्षयकृच्चतुर्थे ७६ मंदोबलप्रात्रिषडाप्यवर्तिकरोतिनूनंसकलार्थला

भं वित्तक्षयं वित्तगतोंकसंस्थः पापोदयं कर्मगतोर्थनाशं ७७ रिःफाष्टमूर्त्यस्तसुतश्चतुर्थो धर्मा
र्थकर्मस्थितवित्तविनाशं करोति कष्टं विविधं च राहुस्त्रिषष्ठलाभोपगतः प्रतिष्ठां ७८ क्षेप
कः यदि सुरेज्यगुरुस्तनुगस्त्रिगः प्रसबलप्रपातिहिबुकाश्रितः परिविजित्य रिपोर्जनसंच
यं धनचयं प्रकरोति गजादिकं ७९ मदनपस्तनुगस्तनुगो गुरुर्यखलैः सहितो न च वीक्षि
तः भवति चात्र धनं बहु ~~सुराधिपती ज्यसमन्वितः~~ लं तदा नरपतित्वमिदं विपुले क्षितौ ८०
धनपतिः कुरुते धनगोधनं यदि सुराधिपती ज्यसमन्वितः सुतगतः सुतपः सबलोदयात्सुत
सुखं बहुलं तनुते तदा ८१ गुरुसितौ यदि चास्तमुपागतौ हिमरुचिर्यदि नीचपदानुगः तनु भ
तां तनुते विपदं तनोर्मरणमत्र वियोगकरं परं ८२ निधनभावगतस्तनुनायको यदि कुजेन यु
तोथ वा लोकितः खलु तनो कफवातकरो यथा बहुविधां तनुते च महद्भयं ८३ मदपतिर्मदगः
सबलो यदा खलखगैः सहितो न च वीक्षितः मुनिवरैर्गदितं बहुलसुखं युवतिवर्गभवं विवि

85

धंतदा ८४ लग्नंयदादुष्टखगैःसमेतंसौम्यग्रहैर्नोसहितंचदृष्टं प्राग्योमघंबहुलंचमांसंतदावि
वादंकुजेनैर्नराणां ८५ वेश्यानुरागोमदपेविनष्टेदुष्टान्वितेस्यात्सुरभार्ययोस्तिः नष्टेविदग्धे
खलखेटयुक्तेधर्माधिपेज्ञातिविपर्ययस्स्यात् ८६ मंदान्वितोरात्रिपतिर्व्ययस्थोदेवार्थितोष
ष्टगतोविलग्नात् सौख्यार्थनाशंप्रकरोतिशीघ्रंभूपात्तथाचोरजनाच्चदुष्टात् ८७ मुंथा[illegible]
युक्तंप्रसमागताथास्तंगतावीर्ययुतास्तदाब्दं रम्यंसुखार्थागमनंविलासंकुर्वंतुतेव्यस्तगता
श्चव्यस्तं ८८ त्रिकोणकेंद्रादिगतेब्दनाथेसौम्येचरम्यंसकलंतदाब्दं षडष्टरिष्फोपगतेवि
वीर्येकष्टप्रदंतन्ददितंमुनींद्रैः ८९ अथमासाधिपतोत्रिषडायुगेखलखेगेसकलंसबलेशु
भं व्ययविनाशगतेविबलेतदानचशुभंगदितंमुनिभिर्नृणां ९० मुंथाधिपोव्ययरसाष्टग
तोविवीर्योदुष्टग्रहस्सशुभवर्गगतोब्दकाले कष्टंन्टणांपरिकरोतिभयंविवादंलोकैस्तथानि

१९

जसनैः सकलं नितांतं ९१ सौम्यग्रहे तु पंचयोपगतैः समस्तैर्लग्नत्थानित्रिपतेः सबलैर्नराणां दद्युर्द्दनानि विविधानि विलासतास्यं सौख्यागमं निखिललोकजनास्तथिव्या॥९२॥ इति तनिजकेसरि मिश्रभावो ध्यायः॥ अथ द्वादशभावविचारः॥ लग्नाधिपे पूर्णबलेऽतिसौख्यमारोग्यता कांतिविवर्द्धनं च दुखंभवेन्मध्यबलेथ नष्टे कष्टं व्ययाष्टारिगतेऽल्पसौख्यं ९३ केंद्रस्थिते लग्नपतौ च सौम्यैर्दृष्टे स्थिते वा नवपंचमस्थे सौख्यं विलासं विजयो भवेद्वा केंद्रलग्नेराशिपतौ बलाढ्ये॥९४॥ इति तनुभावः॥ अथ धनभावः॥ वित्तेश्वरे जन्मनि देवपूज्ये वर्षे धनस्थे धनलाभ स्त्स्यात्त वर्षाधिनाथे नयुते क्षितौ वा जीवे थवा वर्षपतौ बलाढ्ये ९५ एवं विधे भार्गवजे थवा स्ते धनं तदा स्यात्त्वतुलं विचित्रं कलान्विते वित्तपतौ धनाप्तिर्हानिः खलाढ्यो विबले स्वनाथे ९६ पापान्विते देवगुरौ द्वितीये रंध्रे थवा स्पभयं तदा स्यात् तत्र स्थिते देवगुरौ सवांगे तत्र स्थिते द्धनलाभमत्र॥९७॥ इति धनभावः॥ अथ सहजभावः॥ वर्षाधिपे केंद्रे सबले त्रि

१९

संस्थे लाभस्थिते वा सहजाच्च सौख्यं शुक्रे तथैवं भृकटार्थनाशं दग्धेस्तगे क्रूरयुक्षिते वा ९८

सहोत्थगे देवगुरौ सहोत्था सौख्यं तदीशे सबले त्रिगे वा सहोत्थसद्माधिपतौ बलिष्ठे नास्तंगते विक्रमगे तथा स्यात् ९९ सहोत्थगे ज्ञे सकुजे त्रिसंस्थे वैरं कुजे स्थानगते र्कपुत्रे मांद्यं रविस्थानगते महीजे भयं च दौख्यं सहसंभवानां २०० वर्षे थवा जन्मनि वीर्ययुक्ते शुक्रे विधुस्थानगते नुजानां वृद्धिः प्रवाच्या च कलेगेवा हानिस्तथा मृषरिफे खलैर्वा ॥ १ ॥ इति सहजभावः ॥ अथ सुहृद्भावः ॥ तुर्यस्थिते चंद्रसुते दिनेशे पापेक्षिते स्याद सुखं हि पुत्रोः सुख स्थिते तुर्यपतौ बलाढ्ये सुखं च सद्माधिपतौ तथैवं २ सौरे रविस्थानगते विवादं पित्राचराचीशापदे जननन्याः भयं भवेत् क्रूरहते थ नष्टे सुखाधिपे वा किसिमाधिपे वा ३ यस्थानगो जन्मनि रात्रिनाथ स्तस्थः शनिर्मातृभयं करोति यद्राशिगो व्योमचरः स वां गत मैं भवत्तस्य पदं खगस्य ॥ ४ ॥ इति सुहृद्भावः ॥

अथ सुतभावः॥ वर्षेश्वरे देवगुरौ सुतस्थे लाभे धनावीर्ययुते स्वपुत्रात् सौख्यं रवौ वा शशि
जे कुजे वाप्येवं विलोमाद्भवति प्रकष्टं ५ देवार्चितो जन्मनि यत्र राशौ वर्षेऽत्र राशिर्यदि यं च मस्थः
तत्र स्थिते वर्षपतौ बुधे वा भौमेऽपि वा पुत्रसमुद्भवः स्यात् ६ यद्राशिगो जन्मनि सूर्यसूनुर्वर्षे च
तन्मेऽच भवेद्विलग्नं संतानकष्टं च कुजः सुतस्थो विलोमगः पुत्रहरो निरुक्तः ७ संतानस्
थाधिपतौ बलिष्ठे पुत्रोपगे पुत्रसुखं प्रवाच्यं क्रूराह्निते चास्तगते विनाशो देहोद्भवानां स्वद
शाप्रवेशे॥८॥ इति सुतभावः॥ अथ रिपुभावः॥ मंदे वर्षपतौ विलोमगतिगे स्यात्संनिपातो महा
न्रक्तार्तिश्च रसोपगे तनुभृतां पीडा ज्वराद्या ध्रुवं एवं देवगुरौ बलेन सहिते वातार्तिहृद्भूमि
